## १. परिक्रयणे सम्प्रदानमन्यतरस्याम् १/४/४४

**पदच्छेदः** - परिक्रयणे, सम्प्रदानम्, अन्यतरस्याम् इति सम्प्रदानसंज्ञाविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - **कारके** इत्यस्य अधिकारः अस्ति तथा च **साधकतमं करणम्** इति सूत्रात् **साधकतमम्** इत्यनुवर्तते।

**समासः** - नास्ति।

**वृत्तिः** - परिक्रयणे साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्।

**सूत्रार्थः** - परिक्रयणम् इस्यस्य तात्पर्यम्- परिमितकालं भृत्या(वेतनादिना) स्वीकरणम् इति, अस्यां क्रियायां यत् साधकतमं कारकं भवति, तस्य विकल्पेन सम्प्रदानसंज्ञा भवति।

यदा अनेन सम्प्रदानसंज्ञा न भवति तदा साधकतमत्वात् करणसंज्ञा जायते।

**उदाहरणम्** -

यज्ञदत्तेन देवदत्तः शतेन/शताय परिक्रीतः।

## वार्तिकम्- तादर्थ्ये चतुर्थी वाच्या

**समासः** - तस्मै इदम् = तदर्थम्। तदर्थस्य भावः = तादर्थ्यम्।

**वार्तिकार्थः** - तादर्थ्ये गम्ये चतुर्थी भवति। तादर्थ्यं च अत्र उपकार्योप-

कारकभावरूपम्। उपकार्यत्वं च बहुविधं भवितुम् अर्हति।

महाभाष्ये 'यूपाय दारु, कुण्डलाय हिरण्यम्' इत्यादि-उदाहरणदानात् उपकार्याद् एव चतुर्थी इति नियम्यते।

**उदाहरणम्**- मुक्तये हरिं भजति।

## वार्तिकम्- क्लृपि सम्पद्यमाने च

अत्र 'क्लृपि' इति सप्तम्यन्तं पदम्। कप्ल्प्यते इति क्लृप्। 'सम्पदादिभ्यः क्विप्' इति भावार्थे क्विप् प्रत्ययः। ततः सप्तमी। तेन यत्र क्लृप्क्रिया अस्ति, तत्र सर्वत्र अस्य वार्तिकस्य प्रयोगः इति गम्यते।

सम्पद्यमानम् = विकाररूपेण परिणीयमाणम्। अतः प्रकृतिविकृतिभावे एव एतद् वार्तिकम् इति फलति। अतः यः विकारवाचकः भवति, तस्मात् चतुर्थी।

**वार्तिकार्थः** - क्लृप्त्यर्थकधातूनां योगे यत् सम्पद्यमानम् अस्ति, तत्र चतुर्थी

भवति।

**उदाहरणम्** - भक्तिः ज्ञानाय कल्पते = भक्तिः ज्ञानात्मना परिणमते।

दुग्धं दध्ने सम्पद्यते।

## वार्तिकम्- उत्पातेन ज्ञापिते च। वाताय कपिला विद्युत्

**वार्तिकार्थः** - उत्पातेन ज्ञापिते अर्थे विद्यमानात् शब्दात् चतुर्थी।

उत्पातः = अशुभसूचकः आकस्मिकः भौतिकपदार्थानां विकारः।

उत्पातेन यद् ज्ञापितं भवति, तस्मात् चतुर्थी इति तात्पर्यम्

**उदाहरणम्**- वाताय कपिला विद्युत् = महावातस्य ज्ञापिका कपिला विद्युत्।

## वार्तिकम्- हितयोगे च

**वार्तिकार्थः** - हित-शब्दस्य योगे अपि चतुर्थी भवति।

**उदाहरणम्**- तस्मै हितम्।

## २. क्रियार्थोपपदस्य च कर्मणि स्थानिनः २/३/१४

**पदच्छेदः** - क्रियार्थोपपदस्य, च, कर्मणि, स्थानिनः - इति चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः**- **चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** - क्रियायै इयम् इति क्रियार्था (क्रिया), क्रियार्था उपदं यस्य तत् क्रियार्थोपपदम्, तस्य। उपोच्चरितं पदम् = उपपदम्। स्थानम् (एव) अस्य अस्ति (साक्षाद् उपस्थितं नास्ति) - स्थानी, तस्य- स्थानिनः = अप्रयुज्यमानस्य।

**वृत्तिः** - क्रियार्था क्रिया उपपदं यस्य, तस्य स्थानिनोऽप्रयुज्यमानस्य तुमुनः कर्मणि चतुर्थी स्यात्।

**विशेषः - तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३/३/१०** इति सूत्रेण क्रियार्थायां क्रियायां तुमुन्-ण्वुल्-प्रत्ययौ विधीयेते, अतः क्रियार्थम् उपपदं 'क्रिया' एव भवति इति अनुमीयते। अतश्च सूत्रे साक्षात् तुमुनः कथनाभावेऽपि वृत्तौ 'अप्रयुज्यमानस्य तुमुनः' इत्युक्तम्। केवलं प्रत्ययस्य तु प्रयोगो न भवति, अतः 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषानुसारं 'तुमुन्नन्तस्य' इत्यर्थः लभ्यते। तुमुना सह ण्वुलः अपि विधानात् ण्वुलन्तस्यापि अत्र बोधः शक्यः तथापि आधिक्येन तुमुन्नतस्यैव प्रयोगात् तदुक्तम्।

**सूत्रार्थः** - क्रियार्था या क्रिया, तद् उपपदं यस्य, तस्य अप्रयुज्यमानस्य तुमुन्नन्तस्य ण्वुलन्तस्य च यत् कर्म, तस्मिन् चतुर्थीविभक्तिः भवति।

**उदाहरणम्**- फलेभ्यो याति। (फलानि आहर्तुं याति)

नृसिंहाय नमस्कुर्मः। (नृसिंहम् अनुकूलयितुं नमस्कुर्मः)

स्वयम्भुवे नमस्कृत्य... (स्वयम्भुवम् अनुकूलयितुं नमस्कृत्य स्तौति।

## ३. तुमर्थाच्च भाववचनात् २/३/१५

**पदच्छेदः** - तुमर्थात्, च, भाववचनात् - चतुर्थीविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** -**चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** - 'तुम्' इत्यनेन तुमर्थः लक्ष्यते। तुम् अर्थः यस्य सः तुमर्थः, तस्मात्।

भावः = क्रिया उच्यते अनेन इति भाववचनः, तस्मात्।

**वृत्तिः** - **भाववचनाश्च** इति सूत्रेण यः विहितः, तदन्तात् चतुर्थी स्यात्।

**विशेषः** - भाववचनाश्च 3/3/11 इति सूत्रेण- 'भावे' इति सूत्राधिकारे जायमानाः घञादिप्रत्ययाः क्रियार्थायां क्रियायां सत्यां भविष्यति अर्थे स्युः' इति नियमः क्रियते। तेन सूत्रेण प्रत्ययविधानानन्तरं यः कृदन्तशब्दः भवति, तस्मात् चतुर्थी स्यात् इति 'तुमर्थाच्च भाववचनात्' इति सूत्रं वदति।

**उदाहरणम्**- यागाय याति।

भूतये व्रजति।

### ४. नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २/३/१६

**पदच्छेदः** - नमःस्वस्तिस्वाहास्वधालंवषड्योगात्, च - चतुर्थीविधायकं द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - **चतुर्थी सम्प्रदाने** इत्यस्मात् **चतुर्थी** इत्यनुवर्तते।

**समासः** - नमश्च स्वस्ति च स्वाहा च स्वधा च अलं च वषट् च इति नमःस्वस्तिस्वाहास्वधालंवषटः, तैः योगः = नमःस्वस्ति-स्वाहा-स्वधालंवषड्योगः, तस्मात्।

**वृत्तिः** - एभिः योगे चतुर्थी स्यात्।

**उदाहरणम्**- हरये नमः। बालकेभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा।

**विशेषः** - केवलं 'नमस्' इत्यनेन योगे चतुर्थी भवति परन्तु यदा नमस्-शब्दः क्रियापदेन युक्तः भवति, तदा तु **उपपदविभक्तेः कारकविभक्तिः बलीयसी** इति न्यायेन कर्मत्वात् द्वितीयाविभक्तिः एव भवति।

तद्यथा- देवान् नमस्करोति।

**वार्तिकम्- अलमिति पर्याप्त्यर्थग्रहणम्।**

**वार्तिकार्थः** - 'अलम्' इतिपदेन 'पर्याप्तिः' इति अर्थवन्तः सर्वेऽपि शब्दाः गृह्यन्ते।

**उदाहरणम्**- दैत्येभ्यः हरिः अलम्/प्रभुः/समर्थः